# Shri Rama Saptarshi Stotram

# श्रीरामसप्तर्षिस्तोत्रम्

## Document Information

Text title : Shri Rama Saptarshi Stotram

File name : rAmasaptarShistotram.itx

Category : raama

Location : doc_raama

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Description/comments : From stotrArNavaH

Latest update : September 12, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 13, 2020

*sanskritdocuments.org*

Shri Rama Saptarshi Stotram

# श्रीरामसप्तर्षिस्तोत्रम्

काश्यपः –
नित्यं किं धावसि चलविषयाननुभवितुं सुखलेशाभासानुरुतरदुःखानति- दुःसहानत्यन्तायासानंहोमूलानुग्रभ
परिहर सीतापतिमाशु परिचरेशं भो चेतः श्रीरामं भज शरणम् ॥

श्रितचिन्तामणिमतिकरुणाकरमरिहरमुरुतरशरकोदण्डं भो चेतः श्रीरामं भज शरणम् ॥ १॥

अत्रिः –
बहुविधपापवशादिह नानायोनिषु जन्ममृतिर्यो देही दैवादुत्तममानुषपूरुष विप्रदेहविद्यासम्पन्नोऽपि ब्रह्मणि परमे विमुखो दुःखी दुर्विषयैषी नश्यति तृणकबलस्वीकरणे काले पशुरिव रोमन्थं कुर्वन्
भो चेतः श्रीरामं भज शरणम् ।
श्रितचिन्तामणिमतिकरुणाकरमरिहरमुरुतरशरकोदण्डं भो चेतः श्रीरामं भज शरणम् ॥ २॥

भरद्वाजः–
उपर्युपरि मनोरथजालं विद्वानपि कामयते यतते पुत्रमित्रकलत्रादिषु निर्वेदं नैति कामकामी विद्यासम्पत्कुलधनसौभगयौवनगर्वपर्वताधिरूढो मूढः पश्चादन्धे तमसि पतेदवशोऽन्योऽन्धुमिव
भो चेतः श्रीरामं भज शरणं भज रघुरामं शरणम् ॥

श्रितचिन्तामणिमतिकरुणाकरमरिहरमुरुतरशरकोदण्डं भो चेतः श्रीरामं भज शरणम् ॥ ३॥

विश्वामित्रः –
अरिषड्वर्गं जहि तृष्णामपि मायाविलसितमिदमिति बुद्ध्वा दुर्जनसङ्गतिमतिदूरीकुरु सज्जनमाश्रय भो परधनपरदाराभिरतिं त्यज पारलौकिकं धर्मं परिचिनु पद्मापतिपदपद्मं सेव(य)(स्व) बन्धविमुक्त्यै
भो चेतः श्रीरामं भज शरणम् ॥

श्रितचिन्तामणिमतिकरुणाकरमरिहरमुरुतरशरकोदण्डं भो चेतः श्रीरामं भज शरणम् ॥ ४॥

गौतमः –
कर्णाकर्णय वैदेहीवरवर्णनीयगुणवन्दितचरितं नयनालोकय नयननलिनमुखसुन्दरेन्दुबिम्बं मस्तक संस्तुतमहिमानं नम कस्तूरीनिकराकारं हस्तयुगार्चय हरिपदममलं ह्यवनीपालमिनकुलरत्नं
भो चेतः श्रीरामं भज शरणं भज रघुरामं शरणम् ॥

श्रितचिन्तामणिमतिकरुणाकरमरिहरमुरुतरशरकोदण्डं भो चेतः श्रीरामं भज शरणम् ॥ ५॥

जमदग्निः –
परापवादं परिहर जिह्वे पारुष्यं चानृतमपि मा वद सङ्कीर्तय केशव नारायण दामोदर कृष्ण नरहरे वैकुण्ठाधिप लक्ष्मीवल्लभ बुधजनमानसमन्दिर सीतानायक दशरथनन्दन इति सततं भो चेतः श्रीरामं भज शरणम् ॥

श्रितचिन्तामणिमतिकरुणाकरमरिहरमुरुतरशरकोदण्डं भो चेतः श्रीरामं भज शरणम् ॥ ६॥

वसिष्ठः –
नित्यानन्दं सत्यमनन्तं ब्रह्म परात्परमव्ययममलं नित्यं शुद्धं बुद्धं शाश्वतमप्रमेयमनाद्यन्तं सर्वासामुपनिषदामर्थोऽयं श्रीरामः सीतापतिरिति चतुराननशिवहैमवतीजपसर्वस्वं मन्त्रं भो चेतः श्रीरामं भज शरणं भज रघुरामं शरणम् ॥

श्रितचिन्तामणिमतिकरुणाकरमरिहरमुरुतरशरकोदण्डं भो चेतः श्रीरामं भज शरणम् ॥ ७॥

एवं स्तुत्वा रामचन्द्रं मुनीन्द्राः
प्रत्येकं ते भक्तिनम्रास्तदानीम् ।
आपन्नार्तिध्वान्तभानुं प्रपन्ना-
स्तूष्णीमासन् रामपादैकनिष्ठाः ॥ ८॥

इति श्रीरामसप्तर्षिस्तोत्रं सम्पूर्णम् ।

Proofread by Aruna Narayanan

*Shri Rama Saptarshi Stotram*

pdf was typeset on September 13, 2020

Please send corrections to *sanskrit@cheerful.com*